केन विधिना स राजा चन्द्रशेखरः। तारावतीं तदा भार्य्यां ककुत्स्थन्टपतेः सुताम्। संस्कृत्य ग्राहयामास देवेभ्यो वैदिकैर्मखैः”

**ताराषोढ़ा** स्त्री ६त०। तारापूराङ्गे षोढ़ान्यासभेदे तन्त्रसारे तारात्रक० दृश्यम्। “इति षोढ़ा च कथिता तारायाः सर्वसिद्धिदा” तन्त्रसा०। [ताड़िकाशब्दे दृश्यम्।

**तारिका** स्त्री ताड़िका डस्य रः। तालरसजाते मद्यभेदे।

**तारिन्** त्रि० तारयति तॄ–णिच्–णिनि। १तारके। स्त्रियां ङीप्। सा च दशसु महाविद्यासु २द्वितीयविद्यायाम् तद्भेदाः तन्त्रसारे उक्ता यथा “तारा चोग्रा महोग्रा च वज्रा काली सरस्वती। कामेश्वरी च चामुण्डा इत्यष्टौ तारिणी गणाः। अथ भेदान् प्रवक्ष्यामि तारिण्याः सर्वसिद्धिदान्। येषां विज्ञानमात्रेण जीवन्मुक्तो हि साधकः” इत्युपक्रमे तासामभिधानम्। ३बुद्धदेवताभेदे त्रिका०।

**तारुक्ष्य** पु० तरुक्षस्यर्षेरपत्यं गर्गा० यञ्। तरुक्षर्षेरपत्ये। स्त्रियां लोहिता० ष्फ। तारुक्ष्यायणी। यूनि तु तारुक्ष्यायण फक्। यूनि तदपत्ये स च गोत्रप्रवरान्तर्गतः। [स्त्रियां ङीप्।

**तारुण** पुंस्त्री तरुणस्यापत्यम् उत्सा० अञ्। तरुणस्यापत्ये

**तारुण्य** न० तरुणस्य भावः ष्यञ्। यौवने अमरः। “स्मरान्धा गाढ़तारुण्याः समस्तरतकोविदाः” सा० द०। “ततः स राजा तारुण्यादौरसेन बलेन च” भा०शा०१२५ अ०।

**तारेय** पु० तारायाः अपत्यम् ढक्। अङ्गदे १वालिपुत्रे। “करिष्यत्येष तारेयस्तेजस्वी तरुणोऽङ्गदः” रामा० कि०२२सर्गः। २वृहस्पतिभार्य्यायास्तारायाश्चन्द्रजे पुत्रे बुधे च।

**तार्कव** त्रि० तर्कोर्विकारः कोपधत्वात् अण्। तर्कुविकारे सि० कौ०। [२तर्कशास्त्राभिज्ञे च।

**तार्किक** त्रि० तर्कं वेत्ति तच्छास्त्रमधीते वा ठञ्। १तर्कवेत्तरि

**तार्क्ष** पु० तृक्ष एव स्वार्थे अण्। कश्यपे ऋषौ। “प्रमथ्य तरसा राज्ञः शाल्वादींश्चैद्यपक्षगान्। पश्यतां सर्वलोकानां तार्क्षपुत्रः सुधामिव” भाग०। २ पातालगरुड़लतायां स्त्री राजनि० गौरा० ङीष्।

**तार्क्ष्य** पु० तृक्षस्य गोत्रापत्यं गर्गा० वृक्षेत्यत्र तृक्षेति पाठान्तरात् यञ्। १तृक्षमुनेर्गोत्रापत्ये स्त्रियां लोहि० ष्फ। तार्क्ष्यायणी। २गरुड़ाग्रजे अरुणे ३गरुड़े ४अश्वे ५सर्पे पुंस्त्री० ६रसाञ्जने च मेदि०। ७शालवृक्षे ८स्वर्णे च शब्दर० ९अश्वकर्णवृक्ष १०स्यन्दने हेमच०। ११पर्वतभेदे १२विहगमात्रे। “अयमुत्तरात् संयद्वसुस्तस्य तार्क्ष्यश्चारिष्टनेमिश्च सेनानीग्रामण्यौ” यजु० १५।१८। “तीक्ष्णेऽन्तरीक्षे क्षिपति पक्षौ तार्क्ष्यः” वेददी० पृषो०। तत्र गरुडे “आरुह्य तार्क्ष्यं नभसीव भूतले” माघः “भवन्ति निर्विषाः सर्पाः यथा तार्क्ष्यस्य दर्शनात्” पञ्चत०। “त्रस्तेन तार्क्ष्यात् किल कालियेन” रघुः। “दशरात्रमुपयुज्य सर्वं तरति किल्विषं तार्क्ष्यदर्शनमुपपद्यते” सुश्रुतः। तार्क्ष्यस्येव दर्शनं दूरात् दर्शनमित्यर्थः। सर्पे “त्रिपदाः शिखिनस्तार्क्ष्याश्चतुर्दंष्ट्राः विषाणिनः” भा०भी० ३ अ०। [शब्दार्थचि०।

**तार्क्ष्यज** न० तार्क्ष्ये पर्वते जायते जन–ड। रसाञ्जने

**तार्क्ष्यध्वज** पु० तार्क्ष्यो ध्वजोऽस्य। गरुड़ध्वजे विष्णौ हेमच० तार्क्ष्यकेतनादयोऽप्यत्र।

**तार्क्ष्यनायक** पु० ६त०। गरुडे राजनि० तार्क्ष्यनाथादयोऽप्यत्र

**तार्क्ष्यप्रसव** पु० तार्क्ष्यः शैलः प्रसवोऽस्य। अश्वकर्णवृक्षे राजनि०

**तार्क्ष्यशैल** न० तार्क्ष्यशैले भवम् अण्। रसाञ्जने राजनि० “सिन्धूद्भूतं चक्रमर्दस्य बीजमिक्षूद्भूतं केशरं तार्क्ष्यशैलम्”। “लौहं चूर्णं मागधी तार्क्ष्यशैलं तुल्याः कार्य्याः कृष्णवर्णास्तिलाश्च” सुश्रुतः।

**तार्क्ष्यसामन्** न० सामभेदे लाट्या० १।६।१९।

**तार्क्ष्यायण** पुंस्त्री० तृक्षस्य ऋषेरपत्यं युवा गर्गा० वृक्षेत्यत्र तृक्षेति पाठान्तरात् यञ् यूनि फक् अनातीत्युक्तेरापत्यस्य यस्य लोपो न। तृक्षर्षेर्यून्यपत्ये। [शब्दरत्ना०।

**तार्क्ष्यी** स्त्री तार्क्ष्यस्य खगस्य प्रिया अण्। वनलताभेदे

**तार्ण** त्रि० तृणस्येदं शिवा० अण्। १तृणसम्बन्धिनि २तृणजन्ये वह्नौ पु०। “तार्णातार्णोभयं नास्तीत्यत्र तार्णत्वमतार्णत्वञ्च वह्नित्वव्याप्यो जातिभेदः इति नव्यनैयायिकाः। तृणात् तद्विक्रयात् स्थानादागतः आयस्थानत्वात् शुण्डिका० अण्। ३तृणविक्रयरूपार्थस्थानजे करे त्रि०।

**तार्णक** त्रि० तृणानि सन्त्यस्मिन् कृण् कुक् च तार्णकीयास्तस्मिन् भवः विल्वका० छमात्रस्य लुक्। तृणयुक्तदेशभवे।

**तार्णकर्ण** पुंस्त्री० तृणकर्णस्यापत्यं शिवा० अण्। तृणकर्णस्यर्षेरपत्ये। [नामकर्षेर्गोत्रापत्ये।

**तार्णायन** पुंस्त्री तृणस्यर्षेर्गोत्रापत्यम् नडा० फक्। तृण-

**तार्त्तीय** त्रि० तृतीय एव स्वार्थे अण्। तृतीये “प्रथमस्य तृत्तरस्याङ्गस्तार्त्तीयं तृतीयं सवनम्” आश्व० श्रौ० १।१।४

**तार्त्तीयीक** त्रि० तृतीय एव तृतीय+स्वार्थे ईकक्। तृतीये “तार्त्तीयीकं पुरारेस्तदवतु मदनप्लोषणं लोचनं वः” मालतीमाधवम्।